# महिषासुर मर्दिनि स्तोत्रं

ऐ गिरि नंदिनि नंदित मोदिनि विश्व विनोदिनि नंदनुते
गिरि वर विंध्यशिरोधि निवासिनि विष्णुविलासिनि जिष्णुनुते
भगवति हे शितिकंठ कुटुंबिनि भूरिकुटुंबिनि भूरिकृते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 1 ॥

सुरवर वर्षिणि दुर्धर दर्शिनि दुर्मुख मर्शिनि हर्षरते
त्रिभुवन पोषिनि संकटरोषिनि किल्बिषमोषिणि घोषरते
दनुज निरोषिणि दितिसुत रोषिणि दुर्मद शोषिणि सिंधुसुते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 2 ॥

ऐ जगदंब मदंब कदंब वनप्रिय वासिनि हासरते
शिखिरि शिरोमणि तुंग हिमालय शुंग निजालय मध्यगते
मधुमधुरे मधुकैट भगंजिनि कैटभ भंजिनि रासरते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 3 ॥

ऐ शतखंड विखंडित रुंद वितुंडित शुंड गजाधिपते
ऋपगजगंड विदारणचंड पराक्रमशुंड मृगाधिपते
निजभुजदंड निपातित खंड विपातित मुंड भटादिपते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 4 ॥

ऐ रणदुर्मुद षट्टवदोदित दुर्धर निर्जर शक्तिभृते
चतुरविकार धुरीण महाशिव दूतकृता प्रमथाधिपते
दुरित दुरीह दुराशय दुर्मति दानवदूत कृतांतमते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 5

अंतिमधाम
www.antimdham.com
+91-846-0000-648

ऐ शरणागत वैरि वधूवर वीर वराभयदायकृते
त्रिभुवन मस्तक शूलविरोधि शिरोधिकृतामल शूलकरे
दुमिदुमितामर दुंदुभिनाद महो मुखरीकृत तिगमकरे
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 6 ॥

ऐ निजहुंकृतिमात्र निराकृत धूम्रविलोचन धूम्रशते
समरविशोशित शोणितबीज समुद्भवशोणित बीजलते
शिव शिव शुंभ निशुंभ महाहव तर्पित भूत पिशाचरते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 7 ॥

धनुरनुसंग रणक्षणसंग परिस्फुरदंग नटकटके
कनक पिशंग प्रिषत्कनिसंग रसद्भट शृंग हतावटुके
कृतचतुरंग बलक्षितिरंग घटद्बहुरंग रटद्बटुके
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 8 ॥

जय जय जप्यजये जय शब्दपरस्तुति तत्पर विश्वनुते
झण झण झिंझिमि झिंकृतनूपुर सिंजितमोहित भूतपते
नटितनटार्ध नटीनटनायक नटीतनाट्य सुगानरते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 9 ॥

ऐ सुमनः सुमनः सुमनः सुमनः सुमनोहर कांतियुते
श्रितरजनी रजनी रजनी रजनी रजनीकर वक्त्रवृते
सुनयन विभ्रमर भ्रमर भ्रमर भ्रमर भ्रमराधिपते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 10 ॥

अंतिमधाम
www.antimdham.com
+91-846-0000-648

सहितमहाहव मल्लमतल्लिक मल्लितरल्लक मल्लरते
विरचित वल्लित पल्लिक मल्लिक झिल्लक भिल्लक वर्गव्रते
सितकृतफुल्लि समुल्ल सिताकृण तल्लज पल्लव सल्ललिते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 11 ॥

अविरल गंड गलन्मद मेदुर मत्तमतंगज राजपते
त्रिभुवन भूशण भूतकलानिधि रूप पयोनिधि राजसुते
ऐ उदतीजन लालसमानस मोहन मन्मथ राजसुते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 12 ॥

कमलदलामल कोमलकांति कलाकलितामल भाललते
सकलविलास कलानिलयक्रम केलिचटालक हंसकुले
अलिकुलसंकल कुवलयमंडल मौलिमिलाद्बकुलालिकुले
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 13 ॥

करमुरलीरव वीजित कूजित लज्जित कोकिल मंजुमते
मिलितपुलिंद मनोहरगुंजित रंजितशैल निकुंजगते
निजगुणभूत महाशबरीगण  सद्गुण संभृत केलिलते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 14 ॥

कटितटपीत दुकूलविचित्र मयूख तिरस्कृत चंद्ररुचे
प्रणतसुरासुर मौलिमणस्फुर दंशुल सनख चंद्ररुचे
जितकनकाचल मौलिपदोर्चित निर्भरकुंजर कुंभकुचे
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 15 ॥

अंतिमधाम
www.antimdham.com
+91-846-0000-648

विजतसहस्र करैक सहस्र करैक सहस्र करैकनुते
कृतसुरतारक संगरतारक संगरतारक सूनसुते
सुरथसमाधि समानसमाधि समाधि समाधि सुजातरते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 16 ॥

पदकमलाम करुणानिलये वरि वस्यति योऽनुदिनम स शिवे
ऐ कमले कमलानिलये कमलानिलय: स कथं ने भवेत
तव पदमेव परम पदमेव नुशीलतये मम किम न शिवे
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 17 ॥

कनकलसत्कल सिंधु जलैरनुसिंचिनुते गुणरंगभुवम
भजति स किम न शचिकुचकुंभ तटीपरिरंभ सुखानुभवम
तव चरणं शरणं करवाणी नतामरवाणी निवासी शिवम
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 18 ॥

तव विमलेंदुकुलं वदनेंदुमलं सकलं ननु कूलयते
किमु पुरुहूत पुरींदुमुखि सुमुखीभिरसौ विमुखीक्रियते
ममतु मतं शिवनामधने भवति कृपया किमुत क्रियते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 19 ॥

ऐ मयि दीनदयालुतया कृपवैव तया भवितव्यमुमे
ऐ जगतो जननि कृपयासि यतासि तथाऽनुमितासिरते
यदुचितमत्र भवत्युररी कुरुतदुरुत पममपाकुरुते
जय जय हे महिषासुर मर्दिनि रम्यक पर्दिनि शैलसुते ॥ 20 ॥

अंतिमधाम
www.antimdham.com
+91-846-0000-648